सूचनाय विरुद्धेतिपदम्” भा० दूषयति । “न तादृक्पदार्थाप्रतीतेः” सू० । विरुद्धधर्म्मवत्पदार्थस्यासिद्धेरित्यर्थः। अपि चाविद्यायाः साक्षादेव दुःखयोगाख्यबन्धहेतुत्व ज्ञानेन विद्योदयानन्तरं प्रारब्धभोगानुपपत्तिः बन्धपर्य्यायस्य दुःखभोगस्य कारणनाशात् । अस्मदादिमते तु नायं दोषः संयोगद्वारैवाविद्याकर्म्मादीनां बन्धहेतुत्वात् जन्माख्यः संयोगः प्रारब्धसमाप्तिं विना न नश्यति”भा०। पुनः शङ्कते । “न वयं षट्पदार्थवादिनो वैशेषिकादिवत्” सू० “वैशेषिकाद्यास्तिकवन्न वयं षट्षोड़शादिनियत पदार्थवादिनः । अतोऽप्रतीतोऽपि सदसदात्मकः सदसद्विलक्षणो वा पदार्थोऽविद्येत्यभ्युपेयमिति भावः” भा०। परिहरति । “अनियतत्वेऽपि नायौक्तिकस्य संग्रहोऽन्यथा बालोन्मत्तादिसमत्वम्” सू० । “पदार्थनियमोमास्तु तथापि भावाभावविरोधेन युक्तिविरुद्धस्य सदसदात्मकपदार्थस्य संग्रहो भवद्वचनमात्राच्छिष्याणां न सम्भवति । अन्यथा बालकाद्युक्तस्याप्ययौक्तिकस्य संग्रहः स्यादित्यर्थः । श्रुत्यादिकमस्मिन्नर्थें स्फुटं नास्ति युक्तिविरोधेन च सन्दिग्धश्रुतेरर्थान्तरसिद्धिरिति भावः ”भा० । एवं क्षणिकविज्ञानवादनिरसनेन वेदान्तिसमुद्भाविताविद्याऽपि प्रकृतिरेवेति तत्रैव व्यवस्थापितम् । यथा “पारम्पर्य्येऽप्येकत्र परिनिष्ठेति संज्ञामात्रम्”सू० ॥ “अविद्यादिद्वारेण परम्परया पुरुषस्य जगन्मूलकारणत्वेऽप्येकस्मिन्नविद्यादौ यत्र कुत्रचिन्नित्ये द्वारे परम्परायाः पर्य्यवसानं भविष्यति पुरुषस्यापारिणामित्वात् । अतो यत्र पर्य्यवसानं सैव नित्या प्रकृतिः । प्रकृतिरिह मूलकारणस्य संज्ञामात्रमित्यर्थः” भा०॥ नन्वेवं अविद्या स्थानीय प्रकृतेर्नित्यत्वानुपपत्तेस्तस्या उत्पत्तिश्रुतेर्ज्ञाननाश्यत्वाच्चेत्याशयेन मूलसमाधानमाह । “समानः प्रकृतेर्द्वयोः”सू० ॥ “वस्तुतस्तु प्रकृतेर्मूलकारणविचारे द्वयोर्वादिप्रतिवादिनोरावयोः समानः पक्षः । एतदुक्तं भवति यथा प्रकृतेरुत्पत्तिः श्रूयते एवमविद्याया अपि । “अविद्या पञ्चपर्वैषा प्रदुर्भूता महात्मनः” इत्यादिवाक्यैः । अत एकस्या अवश्यं गौण्युत्पत्तिर्वक्तव्या । तत्र च प्रकृतेरेव पुरुषसंयोगादिभिरभिव्यक्तिरूपा गौण्युत्पत्तिर्युक्ता । “संयोगलक्षणोत्पत्तिः कथ्यते कर्मज्ञानयोरिति” कौर्मवाक्ये प्रकृतिपुरुषयोर्गौणोत्पत्तिस्मरणात् । अविद्यायाश्च क्वापि गौणोत्पत्त्यश्रवणात् । तस्या अनादितावाक्यानि तु प्रवाहरूपेणैव वासनाद्यनादिवाक्यवद्व्याख्येयानीति । अविद्या च मिथ्याज्ञानरूपा बुद्धिधर्म इति योगे सूत्रितमतो न नित्यत्वहानिः । अथ वा द्वयोः प्रकृतिपुरुषयोः समान एव न्याय इत्यर्थः । “यतः प्रधानपुरुषौ यतश्चैतच्चराचरम् । कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु” इत्यादिवाक्यैः पुरुषस्याप्युत्पत्तिश्रवणादिति भावः । तथा च पुरुषस्येव प्रकृतेरपि गौण्येवोत्पत्तिः नित्यत्वश्रवणात्तदपि समानमिति । तस्मात् प्रकृतिरेवोपादानं जगतः प्रकृतिधर्मश्चाविद्या जगन्निमित्तकारणं तथा पुरुषोऽपीति सिद्धम् । यत् तु । “अविद्यामाहुरव्यक्तं सर्गप्रलयधर्मिणम्” सर्गप्रलयनिर्मुक्तं विद्यां वै पञ्चविंशकम्” इति मोक्षधर्मे प्रकृतिपुरुषयोरविद्याविद्येति वचनं तत् तदुभयविषयतयोपचरितमेव । परिणामित्वेन हि पुरुषापेक्षया प्रकृतिरसतीति तस्या अविद्याविषयत्वमुक्तम् । एवमेव तस्मिन् प्रकरणे स्वस्वकारणापेक्षया भूतान्तं कार्यजातमविद्येत्युक्तं स्वस्वापेक्षया च स्वस्वकारणंविद्येति । पुरुषस्य परिणामरूपं जगदुपादानत्वं तु प्रकृत्युपाधिकमेव कर्तृत्वादिवच्छ्रुतिस्मृत्योरुपासार्थमेवानूद्यते । अन्यथा“अस्थूलमनण्वह्रस्वमित्यादि”श्रुतिविरोधापत्तेरिति मन्तव्यम् । मायाशब्देन च प्रकृतिरेवोच्यते “मायां तु प्रकृतिं विद्यादिति” श्रुतौ “तस्मान्मायी सृजते विश्वमेतत्” “तस्मिंश्चान्यो मायया सन्निरुद्धः”इति पूर्वप्रक्रान्तमायायाः प्रकृतिस्वरूपतावचनात् । “सत्त्वं रजस्तम इति प्राकृतं तु गुणत्रयम् । एतन्मयी च प्रकृतिर्माया या वैष्णवी स्मृता” ॥ “लोहितश्वेतकृष्णेति तस्यास्तादृग्बह्वप्रजाः” इत्यादिस्मृतिभ्यश्च । न तु ज्ञाननाश्याविद्या मायाशब्दार्थो नित्यतानुपपत्तेः । किञ्चाविद्याया द्रव्यत्वे शब्दमात्रभेदो गुणत्वे च तदाधारतया प्रकृतिसिद्धिः पुरुषस्य निर्गुणत्वादिभ्यः । अथ द्रव्यगुणकर्मविलक्षणैवास्माभिरविद्या वक्तव्येति चेन्न तादृक्पदार्थाप्रतीतेरुक्तत्वादिति” भा० । वेदान्तिनस्तु ज्ञानविरोधि अज्ञानापरपर्य्यायं पदार्थान्तरमविद्येति स्वीचक्रुः तच्च विस्तरेण अज्ञानशब्दे ९२ पृष्ठे दर्शितम् । इयञ्चाविद्या मूलाविद्यातूलाविद्याभेदेन द्विविधा । तत्र हिरण्यगर्भोपाधिर्मूलाविद्या तूलाविद्याश्च प्रतिजीवभेदं नाना मायाशब्देनाभिधीयन्ते । “मायोपाधिरयं जीवः अविद्योपाधिरीश्वर” इत्युक्तेः “इन्द्रोमायाभिः पुरुरूपईयते” इतिश्रुतेश्च तथात्वम् । मायानाञ्च मूलाविद्याकार्य्यत्वात् अविद्याशब्दवाच्यताऽपि । अतएव आविद्यिको जीव इति तत्तत्स्थाने भाष्यकारादिभिरुक्तम् । स्वस्वान्तःकरणरूपाविद्योपाधौ तत्त्वज्ञाने समुत्पन्ने तदीयैवाऽविद्या निवर्त्तते नान्यत्र इत्येकमुक्तौ न सर्वमुक्ति-